नामांक Roll No.

**Sl.No. :**

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

**No. of Questions – 30**

**No. of Printed Pages – 03**

**VU–86–Vyak. Shas.**

# वरिष्ठ उपाध्याय परीक्षा, 2019

## व्याकरणशास्त्रम् (ऐच्छिकम्)

**समय** : 3¼ **घण्टे**

**पूर्णांक** : 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रे निर्धारितस्थाने नामांकः अनिवार्यतो लेखनीयः।

2) सर्वे प्रश्नाः अनिवार्याः।

3) सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेखनीयानि।

4) एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्र एव लेखनीयानि।

5) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतमाध्यमेन एव लेखनीयानि।

यहाँ से काटिए

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

यहाँ से काटिए

1) किं शब्दस्य स्थाने कादेशः केन सूत्रेण भवति? [1]

2) "विश्वौहः" इत्यत्र भसंज्ञक वकारस्य स्थाने किं सम्प्रसारणं भवति? [1]

3) भादौ प्रत्यये परे अपस्तकारः केन सूत्रेण भवति। [1]

4) 'उपानत्' इत्यत्र नहो हस्य धः केन सूत्रेण भवति। [1]

5) "स्वरादिनिपातमत्ययम्" इति सूत्रस्यार्थो लेख्यः। [1]

6) अधिकरणं किम्? [1]

7) "तण्डुलानोदनं पचति" इत्यत्र कर्म संज्ञा विधायकं सूत्रं लिखत। [1]

8) "अक्ष्णाकाणः" इत्यत्र तृतीया केन सूत्रेण भवति? [1]

9) "मिन्यन्तः" इति सूत्रस्योदाहरणं लिखत। [1]

10) "घञबन्तः" इति सूत्रस्यार्थो लेख्यः। [1]

11) "चतुरन डु हो रामुदात्तः" इति सूत्रस्य सोदाहरणमर्थो लेख्यः। [2]

12) "चतुर्षु" इत्यत्र रेफस्य विसर्ग निषेधः कथं भवति? [2]

13) "नहो धः" इति सूत्रस्य सोदाहरणमर्थो लेख्यः। [2]

14) तद् शब्दस्य स्त्रीलिङ्गे सर्वाणि रूपाणि लिखत। [2]

15) "अहन्" इति सूत्रस्य सोदाहरणमर्थो लेख्यः। [2]

16) 'पचन्ती' इत्यत्र नुमागमः केन सूत्रेण भवति? [2]

17) गवाक्छब्दस्य रूपाणि क्लीबेऽर्चागतिभेदतः।

असन्ध्यवङ्पूर्वरूपैर्नवाधिकशतं मतम्।।

अस्याः कारिकायाः अर्थो लेख्यः। [2]

18) सम्बोधने अधिकेऽर्थे गम्यमाने का विभक्तिर्भवति? [2]

19) कौचिद् द्वौ प्रयोगौ साधनीयौ – [2+2=4]

लिड्भ्याम्, अनेन, मघोनः।

20) "यूयवयौजसि" इति सूत्रं व्याख्यायताम्। [4]

21) कौचिद् द्वौ प्रयोगौ साधनीयौ– [2+2=4]

उपानत्सु, द्यौः, अनया।

22) कौचिद् द्वौ प्रयोगौ साधनीयौ– [2+2=4]

वारी, स्वनड्वांहि, इमानि।

23) कौचिद् द्वौ प्रयोगौ साधनीयौ– [2+2=4]

तत्र शालायाम्, जीवसे, अधिहरि।

24) कयोश्चिद् द्वयोः सूत्रयोः सोदाहरणं मर्थो लेख्यः। [2+2=4]

"वनो रच", "हलस्त द्धितस्य", "द्विगोः"।

25) कौचिद् द्वौ प्रयोगौ साधनीयौ – [2+2=4]

हरिं भजति, वृक्षमवि चिनोति फलानि, जटाभिस्तापसः।

26) केषाश्चित् चतुर्ण्णां ससूत्रं लिङ्गनिर्धारणं कुरूत – [1+1+1+1=4]

स्वसृ, शष्कुलिः, यत्नः, इक्षुः, कशेरू, यानम्।

27) कयोश्चिद् द्वयोः सूत्रयोः सोदाहरणं मर्थो लेख्यः – [2+2=4]

"धाजन्तश्च", "अन्यू प्रत्ययान्तो धातुः", "कोपधः"।

28) केचित् त्रयः प्रयोगाः साधनीयाः – [2+2+2=6]

चत्वारः, अयम्, महान्, वृत्रघ्नः, राज्ञः।

29) केचित् त्रयः प्रयोगाः साधनीयाः – [2+2+2=6]

होढा, कारिका, गार्गी, नर्तकी, गौर मुखा।

30) केचित् त्रयः प्रयोगाः साधनीयाः – [2+2+2=6]

छात्राणां छात्रेषु वा मैत्रः पटुः, जगतः कर्ता कृष्णः, उपाध्यायादधीते, अग्नेय स्वाहा, पुत्रेणसहागतः पिता।

✈ ✈ ✈

DO NOT WRITE ANYTHING HERE